# Kailasa Shaila Shikharadhipati Stava

# कैलासशैलशिखराधिपतिस्तवः

## Document Information

Text title : Kailasashailashikharadhipati Stava

File name : kailAsashailashikharAdhipatistavaH.itx

Category : shiva, ApaTIkara

Location : doc_shiva

Author : ma. sa. ApaTIkara

Transliterated by : Mandar Mali aryavrutta gmail.com

Proofread by : Mandar Mali aryavrutta gmail.com

Description/comments : stotrapanchadashI by Shri M. S. Apatikar, Satara

Source : Sharada year 11, Vol 21-22, September 1970

Acknowledge-Permission: Pt. Vasant A. Gadgil, Sharada Gaurava Granthamala, 425 Sadashv Peth, Pune 30

Latest update : September 14, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

September 15, 2019

*sanskritdocuments.org*

# कैलासशैलशिखराधिपतिस्तवः

(वसन्ततिलका)

हे नीललोहित सदाशिव विश्वनाथ
मन्दाकिनी-सलिल-भूषण चन्द्रचूड ।
मृत्युञ्जय प्रणतभक्तजनार्तिनाशिन्
कैलास-शैल-शिखराधिपते नमस्ते ॥ १॥

कन्दर्प-दर्प-हर सर्प-विभूषिताङ्ग
भस्माङ्गराग नरमुण्ड-कपाल-माल ।
खट्वाङ्ग-शूल-डमरू-धर काशिनाथ
कैलास-शैल-शिखराधिपते नमस्ते ॥ २॥

शम्भो स्मरान्तक विभो वृषभाधिरूढ
कारुण्य-वारि-जलधे प्रणमाम्यहं त्वाम् ।
संसार-सागर-जलादव मां महेश
कैलास-शैल-शिखराधिपते नमस्ते ॥ ३॥

त्रैलोक्यनाथ गिरिनाथ-सुताधिनाथ
भूताधिनाथ गणनाथ मखाधिनाथ ।
श्रीसोमनाथ जगतामधिनाथ नाथ
कैलास-शैल-शिखराधिपते नमस्ते ॥ ४॥

कर्पूरगौर हर शङ्कर घोररूप
हे नीलकण्ठ भुजगेश-विभूषिताङ्ग ।
विद्युत्प्रभारुणजटाधर वामदेव
कैलास-शैल-शिखराधिपते नमस्ते ॥ ५॥

विश्वावलीं सृजसि शैलसुतान्वितस्त्वं
विश्वम्भरोऽसि शिव-शक्तियुतो सुरेश ।
विश्वं विनाशयसि ताण्डव-नृत्य-काले

कैलास-शैल-शिखराधिपते नमस्ते ॥ ६॥

अज्ञान-कज्जल-विनाशकराय तुभ्यं
सूर्येन्दु-वह्नि-नयनाय सदा नमस्ते ।
दक्षात्मजा-प्रिय महेश्वर पार्वतीश
कैलास-शैल-शिखराधिपते नमस्ते ॥ ७॥

ओङ्काररूप शशिखण्ड-शिखण्ड-मौले
विश्वेश शर्व मदनान्तक शूलपाणे ।
रुद्राक्ष-हार विषमाक्ष पिनाकपाणे
कैलास-शैल-शिखराधिपते नमस्ते ॥ ८॥

कैलास-शैल-शिखराधिपतेः स्तवं यः
श्रद्धायुतो पठति नित्यमनन्यचित्तः ।
नश्यन्ति तस्य बहुजन्मकृतान्यघानि
शान्तिं च सोऽत्र लभते मनसः सुखं च ॥ ९॥

इति श्री आपटीकरविरचितः कैलासशैलशिखराधिपतिस्तवः सम्पूर्णः ।

Encoded and proofread by Mandar Mali aryavrutta gmail.com

*Kailasa Shaila Shikharadhipati Stava*

pdf was typeset on September 15, 2019

Please send corrections to *sanskrit@cheerful.com*